# का शि का

## सप्तमोऽध्यायः
## प्रथमः पादः

### युवोरनाकौ। (१/१२४७)

[1]यु वु इत्येतयोः उत्सृष्टविशेषणयोः अनुनासिकयणोः प्रत्यययोर्ग्रहणम्, तयोः स्थाने [2]यथासङ्ख्यम् अन [3]अक इत्येतावादेशौ भवतः। योः अनः, वोः अकः। नन्द्यादिभ्यो ल्युः (३.१.१३४/२८९६) – नन्दनः। रमणः। सायमादिभ्यष्टचुटचुलौ तुट् च (४.३.२३/१३९१) – सायन्तनः। चिरन्तनः। ण्वुल्तृचौ – कारकः। हारकः। 'वासुदेवार्जुनाभ्यां [4]वुन्' (४.३.९८/१४७८) – वासुदेवकः। अर्जुनकः। अनुनासिकयणोः इति [5]किम्? 'ऊर्णाया युस्' (५.२.१२३/१९२९) – ऊर्णायुः। 'भुजिमृङ्भ्यां युक्त्युकौ' (उ. ३०८) – भुज्युः, मृत्युः [6]इति। एवमादीनां हि यणोऽनुनासिकत्वं न [7]प्रतिज्ञायते, 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' (व्या. प. १२१)। [8]इह युवोरिति [9]निर्देशाद् द्वन्द्वैकवद्भावपक्षे 'अनित्यमागमशासनम्' (व्या. प. ९९) इति नुम् न क्रियते। नपुंसकलिङ्गता [10]वा 'लिङ्गमशिष्यं लोकाश्रयत्वाल् लिङ्गस्य' (चा. प. ७३) इति न भवति। इतरेतरपक्षे तु छान्दसत्वात् वर्णलोपो द्रष्टव्यः।

युवोश्चेद् द्वित्वनिर्देशो द्वित्वे यण् तु प्रसज्यते।
[11]अथ चेदेकवद्भावः कथं पुंवद् भवेदयम्॥

द्वित्वे नैगमिको लोप एकत्वे नुमनित्यता।
[12]अशिष्यत्वाद्धि लिङ्गस्य पुंस्त्वं वेह समाश्रितम्॥

### आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्। (२/४७८)

आयन् एय् ईन् ईय् इय् इत्येते आदेशाः भवन्ति यथासङ्ख्यं फ ढ ख छ घ इत्येतेषां[13] प्रत्ययादीनाम्। फ इत्येतस्य आयनादेशो भवति। 'नडादिभ्यः फक्' (४.१.९९/११०१)–नाडायनः। [14]चारायणः। ढस्य एयादेशो भवति। 'स्त्रीभ्यो ढक्' (४.१.१२०/११२०)–सौपर्णेयः। वैनतेयः। खस्य ईनादेशो भवति। 'कुलात् खः' (४.१.१३९/११६२)–आढ्यकुलीनः। श्रोत्रियकुलीनः। छस्य ईयादेशो भवति। 'वृद्धाच्छः' (४.२.११४/१३३७) – गार्गीयः। वात्सीयः। घ इत्येतस्य इयादेशो भवति। 'क्षत्राद्घः' (४.१.१३८/११६१)–क्षत्रियः। प्रत्ययग्रहणं किम्? फक्कति। ढौकते। खनति। छिनत्ति। घूर्णते। आदिग्रहणं किम्? ऊरुदघ्नम्। जानुदघ्नम्। एते आयन्नादयः प्रत्ययोपदेशकाल एव भवन्ति। कृतेष्वेतेषु प्रत्ययाद्युदात्तत्वं भवति, तथा च 'घच्छौ च' (४.४.११७/३४६३) इति घचश्चित्करणमर्थवद् भवति। शङ्खः, षण्ढः इत्येवमादीनां हि 'उणादयो बहुलम्' (३.३.१/३१३९) इति बहुलवचनाद् आदेशा न भवन्ति। 'ऋतेरीयङ्' (३.१.२९/२४२२) इति वावचनं ज्ञापकं [15]धातुप्रत्ययानामादेशाभावस्य। 'एजेः खश्' (३.२.२८/२९४१), 'पदरुजविशस्पृशो घञ्' (३.३.१६/३१८२) इत्येवमादिषु [16]तु इत्सञ्ज्ञया भवितव्यम्। तद्धितेषु हि खकारघकारयोरादेशवचनम् अवकाशवदिति इत्सञ्ज्ञां बाधितुं नोत्सहते। आयन्नीनोः नकारस्य इत्सञ्ज्ञायां प्राप्तायां प्रतिविधातव्यम्, नित्कार्यं [17]हि सम्भवति॥

---

1. अङ्गस्य इत्येव इत्यधिकम् ब. फ. 2. यथाक्रमम् इ. 3. अक् क. 4. वुञ् फ.ड. 5. किमर्थम् ड. 6. इति नास्ति ब. 7. प्रतिज्ञातं क. 8. इह नास्ति ब. फ. ड. 9. सूत्रनिर्देशात् इ. 10. वापि क. 11. अथ–समाश्रितम् नास्ति क. ह. 12. प्रसिद्धत्वाद्धि इ. 13. स्थाने इत्यधिकम् फ. 14. उदाहरणमिदं नास्ति फ. 15. धातुप्रत्ययादेशा न भवन्ति इति ब.इ. 16. तु नास्ति इ, हि ह. 17. तत्र इ.